श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ हनुमल्लाङ्गूलास्त्रस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ हनुमल्लाङ्गूलास्त्रस्तोत्रम् ॥

श्रीमन्तं हनुमन्तमार्तरिपुभिद्भूभृत्तटभ्राजितं
चाल्पद्वालधिबन्धवैरिनिचयं चामीकराद्रिप्रभम्।
अग्र्यं रक्तपिशङ्गनेत्रनलिनं भ्रूभङ्गभङ्गस्फुरत्
प्रोद्यच्चण्ड मयूखमण्डलमुखं दुःखापहं दुःखिनाम्॥

कौपीनकटिसूत्र मौञ्ज्यजिन युग्देहं विदेहात्मजा-
प्राणाधीशपदारविन्दनिरतं स्वान्तः कृतान्तं द्विषाम्।
ध्यात्वैवं समराङ्गणस्थितमथानीय स्वहृत्पङ्कजे
संपूज्याखिलपूजनोक्तविधिना सम्प्रार्थयेदर्चितम्॥

हनुमन्नञ्जनीसूनो महाबलपराक्रम।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ १ ॥

मर्कटाधिप मार्तण्डमण्डलग्रासकारक।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ २ ॥

अक्षक्षपण पिङ्गाक्ष दितिजासुक्षयङ्कर।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ३ ॥

रुद्रावतारसंसारदुःखभारापहारक।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ४ ॥

श्रीरामचरणाम्भोजमधुपायितमानस।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ५ ॥

वालिप्रमथनक्लान्तसुग्रीवोन्मोचनप्रभो।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ६ ॥

सीताविरहवारीशभग्नसीतेशतारक।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ७ ॥

रक्षोराजप्रतापाग्निदह्यमानजगद्वन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ८ ॥

ग्रस्ताशेषजगत्स्वास्थ्य राक्षसाम्भोधिमन्दर।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ९ ॥

पुच्छगुच्छस्फुरद्वीर जगद्दग्धारिपत्तन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ १० ॥

जगन्मनोदुरुल्लङ्घ्यपारावारविलङ्घन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ११ ॥

स्मृतमात्रसमस्तेष्टपूरक प्रणतप्रिय।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ १२ ॥

रात्रिञ्चरतमोरात्रिकृन्तनैकविकर्तन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ १३ ॥

जानक्या जानकीजानेः प्रेमपात्र परन्तप।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ १४ ॥

भीमादिकमहाभीमवीरावेशावतारक।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ १५ ॥

वैदेहीविरहक्लान्तरामरोषैकविग्रह।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ १६ ॥

वज्राङ्गनखदंष्ट्रेश वज्रिवज्रावगुण्ठन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ १७ ॥

अखर्वगर्वगन्धर्वपर्वतोद्भेदनस्वर।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ १८ ॥

लक्ष्मणप्राणसन्त्राण त्राततीक्ष्णकरान्वय।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ १९ ॥

रामादिविप्रयोगार्त भरताद्यार्तिनाशन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ २० ॥

द्रोणाचलसमुत्क्षेपसमुत्क्षिप्तारिवैभव।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ २१ ॥

सीताशीर्वादसम्पन्न समस्तावयवाक्षत।
लोललाङ्गूलपातेन ममारातीन्निपातय॥ २२ ॥

इत्येवमश्वत्थतलोपविष्टः
शत्रुञ्जयं नाम पठेत्स्वयं यः।
स शीघ्रमेवास्तसमस्तशत्रुः
प्रमोदते मारुतजप्रसादात्॥ २३ ॥

॥ इति हनुमल्लाङ्गूलास्त्रस्तोत्रं संपूर्णम्॥